SUṢAMĀ : Multidisciplinary Research Journal ISSN: 3107-4529
(International Peer-Reviewed & Refereed Journal)
Vol. 1, Issue-4, (Oct-Dec) 2025

# भासकृतिषु कविसमयाः

**Dr. Dibyendu Mondal**
Assistant Teacher
Kamalapur High School, Hooghly, West Bengal, India
Email: dibyendumondal46@gmail.com

**Abstract:** मम शोधप्रबन्धस्य विषयः कविसमयः। अलङ्कार-गुण-रीति-ध्वन्यादिवद् अयमपि अलङ्कारशास्त्रस्य चर्चितविषयः। नवमदशमेशवीयशतके जातेन राजशेखरेण तस्य *काव्यमीमांसा*ग्रन्थे सर्वादौ कविसमयो विस्तरेणालोचितः। यद्यपि *रामायण-महाभारत-गीर्णार*शिलालेखे दिक्पथमागच्छति। परन्तु भामहदण्डिवामनादिप्राचीनालङ्कारिकैः विषयेऽस्मिन् मौनता समाश्रिता। राजशेखरः तस्य *काव्यमीमांसायाः* चतुर्दश-पञ्चदश-षोडशाध्याये अस्य लक्षणभेदोदाहरणानि आलोचितवान्। आलङ्कारिकेषु केवलं राजशेखरेणास्य लक्षणमुपस्थापितम्। राजशेखरमते कवयो यान् अशास्त्रीयान् तथा अलौकिकार्थान् काव्येषु परम्पराक्रमेण उपनिबध्नन्ति ते अर्था हि कविसमयः। परन्तु अत्र वक्तव्यं यत् भामहदण्डिवामनादयः प्राचीनालङ्कारिकाः अशास्त्रीयान् तथा अलौकिकार्थान् काव्यदोषत्वेन अङ्गीकुर्वन्ति। प्रबन्धेऽस्मिन् अस्माभिः कविसमयालोचनसमन्वितग्रन्थनामानि उल्लिखितानि। राजशेखरप्रदत्तं कविसमयलक्षणं स्पष्टीकृतम्। ततः अस्य भेदविषये आलङ्कारिकाणां वैमत्यमुपस्थाप्य स्वीयमतमुपस्थापितम्। नाट्यकारेषु प्राचीनतमः आसीत् भासः। तस्य कृतिषु अलङ्काररीतिनाट्यसन्धिप्रभृतिभिः सह कविसमयाः अपि दरीदृश्यन्ते। प्रबन्धेऽस्मिन् अस्माभिः तस्य दृश्यकाव्याभ्यां केचन कविसमयाः समुद्धृत्य तेषां वैशिष्टं पर्यालोचितं, तेषां प्रयोगकारणमपि निरूपितम्।

**Keywords:** समयः, अशास्त्रीयम्, अलौकिकम्, दोषः।

संस्कृतशास्त्रेषु अन्यतममलङ्कारशास्त्रम्। रसध्वनिगुणरीत्यादयः तत्रत्यालोचितविषयाः। केचनालङ्कारिकाः पुनः कविसमयमपि अववर्णन् इत्यपि अस्माभिः नोपलभ्यते इति न। विषयेऽस्मिन् येषां चित्तं समाकृष्टं तेष्वाचार्यो राजशेखरोऽग्रगण्यः। विषयोऽयं राजशेखरस्य (नवम-दशमेशवीय-शतकम्) *काव्यमीमांसाख्य*ग्रन्थे एव प्राथम्येन उपलभ्यते। परन्तु तत्पूर्वमपि तद्विषयकमालोचनं जातमिति तु तद्ग्रन्थाद् एव ज्ञायते। भामहप्रभृतिप्रमुखालङ्कारिकैः कविसमयविषये मौनता समाश्रिता इत्यपि उल्लेखनीयम्।

परन्तु *महाभारत*स्यादिपर्वणि काव्यस्वरूपालोचनावसरे कविसमयस्योल्लेखः[1] अस्माकं विस्मयमातनोति। रुद्रदाम्नो *गीर्णार*शिलालेखेऽपि (सार्धैकेशवीयशतकम्) कविसमयस्योल्लेखो दिक्पथमागच्छति[2]। *महाभारता*दिग्रन्थेषु उल्लेखादनुमीयते यत् कविसमयोऽपि एकः प्राचीनकाव्यशास्त्रविषयः आसीत्। राजशेखरेणाप्युक्तम्– "सोऽयं कवीनां समयः काव्ये सुप्त इव स्थितः।" (*काव्यमीमांसा*- १६ अध्ययः)

कवीनां समयः कविसमयः। समयशब्दस्य बहवः अर्थाः कोशग्रन्थेषु दृश्यन्ते। *अमरकोशा*नुसारेण (पञ्चमेशवीयशतकम्) समयशब्दस्यार्थाः– "समयाः शपथाचारकालसिद्धान्तसंविदः"।(३/३/१४८) *हलायुध*कोशकारेणापि (दशमेशवीयशतकम्) अस्य बहवः अर्थाः प्रदर्शिताः– सिद्धान्तः, कृतान्तः,

राद्धान्तः, कालः, शपथः, निर्देशः, सङ्केतः, संवित्, क्रियाकारः, आचारः, नियमः, सम्पत्, अवसराश्च। (पृ -६९२)। सत्सु अपि सिद्धान्तादिषु बहुष्वर्थेषु अत्र कविसमयप्रसङ्गे समयशब्दस्याचरणरूपार्थः एव गृहीतः। अर्थात् कवीनामाचरणं हि कविसमयः। अतः कविभिः यत् क्रियते तदेव आचरणपदेन उच्यते। कवेः स्वकीयत्वं मौलिकत्वमेवात्राचरणपदेन द्योत्यते।

कविसमयालोचनवसरे आदौ तस्य लक्षणं विचारणीयम्। अत्र वक्तव्यं यत् कविसमयलक्षणप्रदानविषये राजशेखरोऽद्वितीयः। विषयेऽस्मिन् राजशेखरेतरालङ्कारिकैः मौनता समाश्रिता। तत्र मौनतापि सम्मतेर्लक्षणमिति वचनानुसारेणानुमीयते यद् विषयेऽस्मिन् ते राजशेखरेण सहैक्यमत्यं भजन्ते। कविसमयलक्षणप्रसङ्गे राजशेखरेण प्रोक्तम्– "अशास्त्रीयमलौकिकं च परम्परायातं यमर्थमुपनिबध्नन्ति कवयः स कविसमयः।" (*काव्यमीमांसा* -१४ अध्यायः) अर्थात् राजशेखरमते शास्त्रबहिर्भूतं न्यायस्मृतिप्रभृतिशास्त्रविरुद्धं लोके अविज्ञातं लोकातीतं वा कविसम्प्रदायसम्प्राप्तं यमर्थं केवलं कवयः काव्येषु उपनिबध्नन्ति प्रयोगं कुर्वन्ति वा सः कविसमयः इति।

अत्रेदमुल्लेख्यं यद्भामहादयः आलङ्कारिकाः पुनः अशास्त्रीयम् अलौकिकञ्च विषयद्वयं काव्यदोषत्वेनोद्घोषितवन्तः[3]। परन्तु अत्र वक्तव्यं यत् चमत्कारिताविवर्धनार्थमेव एतेषामुपयोगः कृतः कविभिः। काव्यस्य विषयो लोकशास्त्रानुसारी एव भवेद्विषयेऽस्मिन् कश्चित् सुदृढो नियमः नास्ति। वस्तुतः कवयो नियतिकृतनियमरहिताः भवन्ति। अतः तैः स्वतन्त्रतया एतेषां विषयाणामुपन्यासं कृतम्। यतो तेषां प्रधानकार्यं हि चमत्कारिताविवर्धनम्। काव्यस्य मुख्यप्रयोजनं हि सद्यः परनिर्वृतिः। सद्यः परनिर्वृतिः नाम काव्यश्रवणात् पठनाद्वा तत्क्षणादेव ब्रह्मस्वादवत् स्वादं लभते सहृदयः। तस्माद् येन काव्यं सरसं भवेत् तथैव कविभिः आचरणीयम्। अतः काव्यस्य सरसतोपपादनाय ये केऽपि विषया उपन्यस्तुं शक्यम्। ततः अशास्त्रीयालौकिकयोः विषयोपन्यासेऽपि न क्षतिः। मम्मटादयरालङ्कारिकाः अपि केवलं रसापकर्षकविषयस्य दोषत्वम् अभ्युपगच्छन्ति[4]। अत्र वक्तव्यम् अशास्त्रीयालौकिकविषयाः सदा रसापकर्षका न भवन्ति परन्तु बहुक्षेत्रेषु ते रसस्यौत्कर्षमपि विदधति, तत्फलतया एते विषया न सदा काव्यदोषाः किन्तु कदाचन काव्यगुणा अपि। कवीनां काव्यमेवास्मिन् विषये प्रमाणम्।

तत्र राजशेखरस्य (नवम-दशमेशवीयशतकम्) *काव्यमीमांसाग्रन्थे*, हेमचन्द्रस्य (एकादश-द्वादशेशवीयशतकम्) *काव्यानुशासने*, नरेन्द्रप्रभसूरिनः (त्रयोदशेशवीयशतकम्) *अलङ्कारमहोदधिग्रन्थे*, अजितसेनकृतस्य (त्रयोदशेशवीयशतकम्) *अलङ्कारचिन्तामणिग्रन्थे*, अमरचन्द्रयतेः (त्रयोदशेशवीयशतकम्) *काव्यकल्पलतावृत्तिग्रन्थे*, देवेश्वरस्य (त्रयोदश-चतुर्दशेशवीयशतकम्) *कविकल्पलताख्यग्रन्थे*, वाग्भटस्य (द्वितीयः) (चतुर्दशेशवीयशतकम्) *काव्यानुशासने*, विश्वनाथस्य (चतुर्दशेशवीयशतकम्) *साहित्यदर्पणे*, अमृतानन्दयोगिकृते (चतुर्दशेशवीयशतकम्) *अलङ्कारसंग्रहग्रन्थे*, केशवमिश्रमहोदयस्य (षोडशेशवीयशतकम्) *अलङ्कारशेखरे*, कृष्णशर्मनः (ऊनविंशईशवीयशतकम्) *मन्दारमरन्दचम्पूग्रन्थे* मुख्यतया कविसमयः आलोचितः।

कविसमयस्य भेदविषये आलङ्कारिकाणां मतानैक्यं दृश्यते। राजशेखरेण आदौ स्वर्गभौमपातालभेदेन कविसमयस्य त्रैविध्यं, ततः भौमस्य पुनः द्वादशभेदाः प्रदर्शिताः[5]। इतरालङ्कारिकैः स्वर्गभौमपातालभेदा नाङ्गीकृताः। तेषां मतानि विचार्य्य कविसमयस्य असतो निबन्धन-सतोऽनिबन्धन-नियम-नियमविशेषाः इति चातुर्विध्यमस्माभिः अङ्गीकृतम्। अत्र वक्तव्यं यद् अमृतानन्दयोगिविश्वनाथौ अस्य भेदविषये मौनं भजेते।

संस्कृतसाहित्याकाशे भास्वान्निव भासतेतरां नाट्यकारो भासः। तेन विरचितानि *प्रतिमा-अभिषेक-यज्ञफल-कर्णभार-ऊरुभङ्ग-दूतवाक्य-दूतघटोत्कच-पञ्चरात्र-बालचरित-स्वप्नवासवदत्त-प्रतिज्ञायौगन्धरायण-मध्यमव्यायोग-अविमारक-चातुदत्त*नाटकानि उत्त्रसद्दशानि। विषयचयने तथा वृत्तान्तकथने स आसीद् अद्वितीयः। तस्य कृतिषु विविधालङ्कार-ध्वनि-गुण-रीतीनां प्रयोगः दृग्गोचरो भवति। कविसमयप्रयोगेऽपि स आसीत् सिद्धहस्तः। शोधबन्धेऽस्मिन् तत्प्रयुक्तकविसमयाः एव विविच्यन्ते। एवं तेन प्रयुक्तकविसमयेष्वन्यतमः—

**1. सर्वजलाशयेषु हंसाः —**

जलविराजमानपक्षिषु हंसोऽन्यतमः। एतादृशो हंसः केषुचिदेव कालेषु केवलं गभीरे निर्मले च जलाशयेषु दृग्गोचरो भवति। हंसशोभितजलाशयाः प्रायः रमणीया भवन्ति। एते हंसा यद्यपि आवर्जनादिपरिवेष्टिते स्वल्पजलाशये न सन्तरन्ति। परन्तु जलाशयसौन्दर्यविवर्धनार्थं कविभिः सदा जलाशयस्य उल्लेखकाले हंसोल्लेखः अपि कृतः। अर्थाद् यत्र यत्र जलाशयाः तत्र तत्र हि हंसाः इति। एवम्प्रकारेण हंसः इति विषयः कविसमयत्वेन गृहीतो जातः। अयं खलु असतो निबन्धनरूपकविसमयः।

*प्रतिमानाटक*स्य प्रथमाङ्के शरद्वर्णनाकाले प्रकृतिशोभाविवर्धनाय श्वेतकाशपुष्पेण सह नद्यां हंससञ्चरणं भासेन चित्रितम्। वस्तुतः पक्षिपुष्पैः जलाशयशोभा विवर्धिता भवति। तत्र स्त्रोतविहीने जलाशये हि कमलकुमुदानि विकशन्ति। अतः नद्याः शोभाविवर्धनाय अत्र हंसविचरणं भासेन वर्णितम्।

चरति पुलिनेषु हंसी काशांशुकवासिनी सुसंहृष्टा।
मुदिता नरेन्द्रभवने त्वरिता प्रतिहाररक्षीव ।।(१/२)

*ज्ञफल*नाटकेऽपि शरत्शोभावर्णनकाले लक्ष्मणः जलाशये हंससन्तरणं निगदितम् –

सरस्यगाधसलिले राजन्ते मानसौकसः।
रसपूर्णे कवेश्चित्ते नवा भावा इवोज्ज्वलाः।।(५/३७)

**2. सर्वपर्वतेषु रत्नानि –**

रत्नानि ऐश्वर्यव्यञ्जकानि विरलानि च। रत्नाकरात् क्वचित् पर्वतात् तानि उपलभ्यन्ते। सर्वपर्वतेषु रत्नानि न तिष्ठन्ति। केवलं केषुचिद्विशिष्टपर्वतेषु तानि तिष्ठन्ति। परन्तु कवयः प्रायः सर्वपर्वतेषु तेषां स्थितिं वर्णितवन्तः। अत्र वक्तव्यं यद्रत्नानि यथा जनानामैश्वर्यं प्राचुर्यमाभिजात्यञ्च प्रदर्शयन्ति, सौन्दर्यञ्च विवर्धयन्ति तथैव तैः तस्य पर्वतस्यापि गौरवं माहात्म्यञ्च द्योतितं भवति। अतः कविभिः स्वीयकाव्येषु वर्णितानां प्रायः सर्वपर्वतानां गौरवं माहात्म्यञ्च द्योतनाय तत्र रत्नानां स्थितिः अङ्गीकृता। सर्वपर्वतेषु रत्नस्य अविद्यमानत्वेऽपि तत्र रत्नवर्णनाद् अयमसतो निबन्धनकविसमयः।

*बालचरित*स्य द्वितीयाङ्के मेरुपर्वते कनकस्थितिः कंसेन वर्णिता–

सौवर्णकान्ततरकन्दरकूटकुञ्जं मेरुं न कम्पयति वायसपक्षवातः।
हास्योऽपि भोः समकरक्षुभितोर्मिमालं पातुं य इच्छसि कराञ्जलिना समुद्रम्।।(२/६)

*अभिषेक*नाटकस्य द्वितीयाङ्के लङ्कायाः प्रभूतैश्वर्यप्रतिपादनार्थं तत्र रत्ननिर्मिताचलानां वर्णनं हनुमता उपस्थापितम्–

चित्रप्रस्रुतहेमधातुरुचिराः शैलाश्च दृष्टा मया
नानावारिचराण्डजैर्विरचिता दृष्टा मया दीर्घिकाः।
नित्यं पुष्पफलाढ्यपादपयुता देशाश्च दृष्टा मया

सर्वं दृष्टमिदं हि रावणगृहे सीता न दृष्टा मया।।(२/६)

**3. वर्षासु मल्लिकापुष्पस्यानुपस्थितिः –**

श्वेतधवलं सुगन्धिमल्लिकापुष्पं संस्कृतकवीनां परमादरणीयम्। यद्यपि ग्रीष्मर्तौ तथा वर्षासु तत्प्रस्फुटितं भवति परन्तु केवलं ग्रीष्मर्तौ एव तत् पूर्णप्रकाशं लभते। वर्षासु तस्य सौन्दर्यं तादृक् न भाति। तस्मात् सौन्दर्यार्चककविभिः केवलं ग्रीष्मर्तौ वसन्तकाले च मल्लिकापुष्पविलासो वर्णितः। अतः वर्षासु मल्लिकापुष्पविकाशः सत्यपि तस्य वर्णनाभावादयं सतोऽनिबन्धनकविसमयः।

*यज्ञफलस्य* प्रथमाङ्के वसन्ताश्रितगीतगायनकाले नटी मल्लिकाकुसुमशोभा वर्णिता–

णोपल्लवसोहिदा लदाओ सहआरा बहुपरिमलस्सन्दिणो।
पसण्णाइं अ उववणाइं हंसति मल्लिआकुसुमेहिं ।।(१/२)
(नवपल्लवशोभिता लताः सहकारा बहुपरिमलस्यन्दिनः।
प्रसन्नान्युपवनानि हसन्ति मल्लिकाकुसुमैः।।)

*अविमारके*ऽपि कुरङ्ग्या वर्षाविकशितपुष्पाणामुल्लेखकाले मल्लिकापुष्पम् निःसारितम् -

हला! किं तुए मम हिअअं परिञ्ञादं। एथ्थ हि अजाणन्तेण परिजणेण मम परितोसणिमित्तं वउलसरलज्जज्जुणकदम्वणीवणिउलप्पहुदीनि मेहकालवल्लहाणि परमसुरहीणि आणीअमाणानि मं उन्मादअन्ति।

(हला! किं त्वया मम हृदयं परिज्ञातम्। अत्र ह्यजनता परिजनेन मम परितोषनिमित्तं वकुलसरलसजार्जुनकदम्बनीपनिचुलप्रभृतीनि मेघकालवल्लभानि परमसुरभीण्यानीयमानानि मामुन्मादयन्ति।)

**4. मलयाचलो हि चन्दनस्थानम् –**

सुगन्धित्वाद् वृक्षेष्वन्यतमः चन्दनवृक्षः। पूजोपकरणरूपेण, प्रसाधनद्रव्यरूपेण, भेषजद्रव्यरूपेण चास्य बहुविधव्यवहाराः सन्ति। एते चन्दनवृक्षा मलयपर्वते बाहुल्येन तु प्राप्यन्ते। परन्तु केवलं तत्रैव प्राप्यन्ते इति तु न, इतरस्थानेष्वपि नूनतया सन्ति। चन्दनवृक्षाः खलु सुदुर्लभाः परन्तु मलयगिरौ एतेषां बाहुल्येन उपस्थितिः दृश्यते। तत्कारणात् कविभिः स्वीयग्रन्थेषु यत्र यत्र चन्दनस्य प्रसङ्गः उपस्थापितः तत्र तत्र मलयपर्वतस्यापि उल्लेखः तैः विहितः। अत्र एवमपि वक्तुं शक्यते यत् चन्दनः शीतलः, तुषारावृतमलयाचलोऽपि तथैव। अतः शैत्यरूपसाम्यात् मलयाचले चन्दनसान्निध्यं कविभिः अङ्गीकृतम्। अयं खलु अस्य कविसमयस्य मूलाधारः। मलयाचलेतरस्थानेषु चन्दनस्थितिः सत्यपि केवलं मलयाचले तस्य वर्णनादयं नियमकविसमयः।

*अविमारकस्य* चतुर्थाङ्के प्रियाविच्छिन्नोऽविमारकः अग्नौ प्राणत्यागं स्थिरीकृतवान्। परन्तु अग्निदेवप्रभावाद् अग्निस्पर्शः तेन शीतलवत् प्रतिभातः। अत्र अग्नेः शीतलस्पर्शो मलयचन्दनेन सह उपमितः—

दग्धाः स्फुलिङ्गनिकरैर्निपतन्ति वृक्षाः
ज्वालाश्च मे मलयचन्दनपङ्कशीताः।
अग्निर्दयां हि कुरुते मदनातुरेऽपि
पुत्रं पितेव च परिष्वजति प्रहृष्टः ।।(४/८)

*यज्ञफलस्य* चतुर्थाङ्के विश्वामित्रः चन्दनस्य प्रकृष्टस्थानरूपेण मलयाचलं स्वीकृतवान्–

विकसति सरसि सरोजम् मलयाद्रौ चन्दनं भाति।
एवं खलु वस्तूनि वर्धन्ते निजस्थानेषु।। (४/३३)

**5. केवलं दिवसे कमलविकाशः, केवलं निशायां कुमुदविकाशः —**

उदिते सूर्ये कमलं प्रकाशते, उदिते चन्द्रे कुमुदं प्रकाशते। एवमस्तमिते सूर्ये कमलं सङ्कुचितं भवति तथैव दिवा सूर्योदये चन्द्रविलये कुमुदमपि सङ्कुचितं भवति। वस्तुतः दिवाभागे कुमुदस्य तथा रात्रौ कमलस्य ईषद्रूपेण हि सङ्कोचनं भवति। परन्तु तदा तयोः ईषत्सङ्कोचनं कविभिः नेष्ठम्। अतस्तैः दिवा कुमुदस्य नक्तं कमलस्य पूर्णसङ्कोचः एव स्वीकृतः। किञ्च संस्कृतसाहित्ये पद्मिनी सूर्यनायिका, सूर्यः तस्य नायकः। एवं कुमुदिनी पुनः चन्द्रनायिका चन्द्रः तस्य नायकः। नायकवियोगे नायिका पूर्णरूपेण विरोहिनी भवति, एवं विरहातिशय्यं द्योतयितुं कविभिः दिवा कुमुदिन्याः नक्तं पद्मिन्याः पूर्णसङ्कोचः एव अभ्युपगतः।

*ऊरुभङ्गे* प्रथमसैनिकेन दिवा लोहितौष्ठविशिष्टमृतनृपाणां मुखेन सह रक्तकमलस्य तुला अङ्गीकृता–
स्रस्तेद्वर्तितनेत्रषद्पदगणा ताम्रोष्ठपत्रोत्करा
भ्रूभेदाञ्चितकेसरा स्वमुकुटव्याविद्धसंवर्तिका।
वीर्यादित्यविबोधिता रणमुखे नाराचनालोन्नता
निष्कम्पा स्थलपद्मिनीव रचिता राज्ञामभीतैर्मुखैः।।(१३)

*अविमारकस्य* तृतीयाङ्के रात्रिशोभावर्णनकाले नायकेन रात्रौ कमलविलयः स्वीकृतः–
अये तन्त्रीनादो युवतिकलगीतध्वनियुतः
अये गन्धामोदो गजवरमदोद्बोधितपटुः।
प्रभैषा दीपानामिह तु वितता रक्षिपुरुषाः
चिराद् रात्रौ शान्तं सह कमलषण्डैर्नृपगृहम्।।(३/१४)

*अभिषेक*नाटकस्य द्वितीयाङ्के सीतानुरक्तो रावणः सन्ध्यायां कुमुदविकाशविषयं उद्गिरति–
रजतरचितदर्पमप्रकाशः करनिकरैर्हृदयं ममाभिपीड्य।
उदयति गगने विजृम्भमाणः कुमुदवनप्रियबान्धवः शशाङ्कः।।(२/११)

**6. कृष्णपक्षे ज्योत्स्नायाः तथा शुक्लपक्षे तमसोऽवर्णनम्–**

उच्यते यामिन्याः अलङ्कारो ज्योत्स्ना। एतादृशज्योत्स्ना शुक्लपक्षवत् कृष्णपक्षेऽपि प्राप्तप्रकाशा। परन्तु कविदृशा ज्योत्स्ना केवलं शुक्लपक्षे एव लब्धप्रकाशा भवति न तु कृष्णपक्षे। कथमिति चेत्? अत्र वक्तव्यं यत्ज्योतिषनये शुक्लपक्षः एव शुभः, कृष्णपक्षोऽशुभः एव। शुक्लपक्षे ज्योत्स्नायाः परिमाणं क्रमेण वृद्धिं प्राप्नोति। व्यत्ययो दृश्यते कृष्णपक्षे। अतः कृष्णपक्षे ज्योत्स्नायाः वर्णने कवयः अनिच्छुकाः। कृष्णपक्षे ज्योत्स्ना सत्यपि तस्य वर्णनाभावादयं सतोऽनिबन्धनकविसमयः।

*चारुदत्तस्य* प्रथमाङ्के वसन्तसेनायाः अन्वेषणकाले तिमिरावृतकृष्णपक्षस्य वर्णनं विटः कृतवान् –
परिचिततिमिरा मे शीलदोषेण रात्रिबहुलतिमिरकालस्तीर्णपूर्वा विघट्टाः।
युवतिजनसमक्षं काममेतन्न वाच्यं विपणिषु हतशेषा रक्षिणः साक्षिणो मे।।(१/१३)

**7. समुद्रेष्वेव मकराः –**

जलचरविशालकायविशिष्टप्राणिविशेषो मकरो गङ्गादेव्याः तथा वरुणदेवस्य वाहनम्। कामध्वजे अपि अस्य चित्रमङ्कितम्। समुद्रवत् नदीष्वपि मकरा दरीदृश्यन्ते। परन्तु कवयः केवलं समुद्रेष्वेव अस्य

स्थितिमामनन्ति। अत्र खलु मकरस्य विशालकायत्वं तथा जलदेवतानां वाहनत्वं हि अस्य कविसमयस्य मूलाशयः।

*बालचरित*स्य द्वितीयाङ्के स्वीयप्रतापप्रदर्शनार्थं कंसः समुद्रे मकरावस्थानमुपस्थापितवान् –

सौवर्णकान्ततरकन्दरकूटकुञ्जं
मेरुं न कम्पयति बाग्रसपक्षवातः।
हास्योऽसि भोः समकरक्षुभितोर्मिमालं
पातुं य इच्छसि कराञ्जलिना समुद्रम्।।(२/६)

*ऊरुभङ्गे* युद्धक्षेत्रे अश्वत्थाम्ना कुरुपाण्डवसैन्यसमुद्रे समुत्थितशस्त्राणां तुला अर्णवविराजमानमकरेण सह कृता –

भोः भोः! समरसंरम्भोभयबलजलधिसङ्गमसमयसमुत्थितशस्त्रनक्रकृतविग्रहाः स्तोकावशेष-श्वासानुबद्धमन्दप्राणाः समरश्लाघिनो राजानः श्रृण्वन्तु भवन्तः ।(५७ श्लोकस्य पूर्वगद्यांशः)

**8. वस्त्रपुष्पछत्राणां श्वेतत्वम्—**

**वस्त्रम्–** लज्वानिवारणं वस्त्रस्य मुख्यमुद्देश्यं सत्यपि तेन जनानां धर्मपरिचयं तथा अर्थनैतिकपरिचियमपि ज्ञापितं भवति। संस्कृतकवयः मुख्यतः वस्त्रस्य श्वेतवर्णमामनन्ति। अत्र वक्तव्यं यदौज्वल्यविषये श्वेतवर्णः इतरवर्णेभ्यः श्रेष्ठः। श्वेतवस्त्रपरिहितजनस्य चारित्रिकशुद्धत्वं पवित्रतापि स्पष्टरूपेण ज्ञापिता भवति। किञ्च विषण्णजनैः अपि श्वेतवस्त्रं परिधीयन्ते।

*प्रतिमा*नाटकस्य सप्तमाङ्के जनस्थाने सीतया सह वार्तालापकाले श्वेतवस्त्रपरिहितविषण्णभरतप्रसङ्गो रामेण उत्थापितः–

एवमेतत्। निम्नस्थलोत्पादको हि कालः। मैथिलि! अप्युपलभ्यतेऽस्य सप्तपर्णस्याधस्ताच्छुक्लवाससं भरतं दृष्ट्वा परित्रस्तं मृगयूथमासीत्।

**छत्रम्–** आतपवृष्टिपाताभ्याम् आत्मानं रक्षणार्थं जनाः छत्रं व्यवहरन्ति। राज्ञां तथा श्रेष्ठसैनिकानां रथशीर्षेऽपि छत्रं दृश्यते। केषुचिद् देवविग्रहेष्वपि छत्रं दिक्पथमागच्छति। अत्र वक्तव्यं यत् जगति छत्रस्य विविधवर्णः सत्यपि तस्य केवलं श्वेतवर्णग्रहणेन तस्य पवित्रताविषयः प्रकाशितो भवति।

*दूतवाक्य*स्य प्रथमाङ्के दुर्योधनः वासुदेवेन सह वार्तालापकाले स्वीयश्वेतछत्रस्योल्लेखं कृतवान् –

अहमवधृतपाण्डरातपत्रो द्विजवरहस्तधृताम्बुसिक्तमूर्धा।
अवनतनृपमण्डलानुयात्रैः सह कथयामि भवद्विधैर्न भाषे।।(३७)

**पुष्पम्–** आलङ्कारिकदिशा श्वेतवर्णविशिष्टवस्तुषु पुष्पमन्यतमम्। विषयेऽस्मिन् वक्तव्यं यत् संस्कृतकवयः येषां सुगन्धिपुष्पाणामुल्लेखं स्वीयकृतिषु कुर्वन्ति तेषु मल्लिका-नमेरु-चम्पक-कुरवक-तिलक-वकुल-श्वेतपद्मानि उल्लेख्यानि। अतः अनुमीयते यत् श्वेतपुष्पं प्रायः सुगन्धि भवति। अपि च पूजायां व्यवहृतेषु पवित्रवस्तुषु श्रेष्ठं पुष्पम्। पुनः तत्र हास्येन सह प्रस्फुटितपुष्पस्य सादृश्यं कविभिः स्वीकृतम्[6]। कविसमयानुसारेण हासोऽपि श्वेतवर्णविशिष्टो भवति[7]।

*प्रतिमा*नाटकस्य सप्तमाङ्के श्वेतरेणुभिः सह लोध्रकुसुमस्य तुला रामेण चर्चिता -

रेणु समुत्पतति लोध्रसमानगौरः सम्प्रावृणोति च दिशः पवनावधूतः।
शङ्खध्वनिश्च पटहस्वनधीरनादैः सम्मूर्च्छितो वनमिदं नगरीकरोति।।(७/४)

परिशेषे एतद् वक्तव्यं यत् जगति बहुविधश्वेतवर्णीयानि वस्तुनि सन्ति एव। परन्तु कविभिः

केवलमेताषां वस्तुनां श्वेतवर्णस्वीकरणादयं नियमकविसमयः।

**9. मेघ-सर्प-पर्वत-राक्षसानां कार्ष्ण्यम्**—

**मेघः**— मेघविषये तस्य निर्घोषः तथा कार्ष्ण्यं कविभ्यः अतीव रोचते। सत्स्वपि नानाविधवर्णेषु केवलं घनस्य श्यामरूपमेव कविभिः स्वीकृयते, कथमिति चेत्, यतो हि कृष्णरूपादेव भयानकरसोद्रेको भवति। एवं विरहीणां विरहोऽपि घनस्य कृष्णरूपात् द्योत्यते। विषयेऽस्मिन् *मेघदूत*काव्यमेव प्रमाणम्। एवमुदात्तकण्ठीनामुद्घोषः क्वचित् मेघनिर्घोषेण सह उपमितः। एवं मेघस्य निर्घोषः तथा कार्ष्ण्यं कविषु प्रीतिं लभते।

*यज्ञफल*स्य पञ्चमाङ्के शरत्सौन्दर्यवर्णनकाले कृष्णमेघरहितनीलगगनशोभा विश्वामित्रेण विवृता–

मग्नोऽभवत्प्रबालशत्रुघनान्धकारे निर्भत्सितः स्तनितचञ्चलदीप्तिमिश्र।

सोद्योदितो विमलविष्णुपदे विराजन् काशैः शरत्तमिह वीजयति ग्रहेशम्।।(५/३९)

*बालचरित*स्य अन्तिमाङ्के कृष्णमेघेन सह दामोदरस्य तुला भटेन प्रतिपादिता–

आपीडदामशिखिबर्हविचित्रवेषः पीताम्बरः सजलतोयदराशवर्णः।

अभ्येति रोषपरिवृतविशालनेत्रो रामेण सार्धमिह मृत्युरिवावतीर्णः।।(५/३)

**सर्पः**— सर्पाः विभत्सरूपाः भीतिजनकाः विषधराः प्राणनाशकाश्च। यद्यपि विविधवर्णीयाः सर्पाः विद्यन्ते तेषु कृष्णवर्णीयाः अधिका भवन्ति। विषधरसर्पेषु अन्यतमः कृष्णसर्पः। अपि च भयानकरसस्य कृष्णवर्णः *नाट्यशास्त्रे*स्वीकृतः[8]।

*बालचरित*स्य तृतीयाङ्के दामोदरः अरिष्टर्षभेन सह वार्तालापकाले कृष्णसर्पोल्लेखं कृतवान् –

किं दष्टः कृष्णसर्पेण बालेन न निहन्यते।

बालेन हि पुरा क्रौञ्चः स्कन्देन निधनं गतः।।(३/९)

**पर्वतः**— कविभिः वर्णनीयविषयेषु अन्यतमः शैलः। प्रायः सर्वे महाकवयः तथा नाट्यकाराः स्वीयकाव्येषु शैलप्रसङ्गः कदाचित् समुपस्थापितः। शैलस्य निर्दिष्टो वर्णो न भवति, यद्यपि कवयः तस्य कृष्णवर्णम् अङ्गीकुर्वन्ति। अत्र वक्तव्यं यत् हिमस्य विद्यमानत्वात् शैलशीर्षं श्वेतवर्णीयो भवति परन्तु अतिहिमं स्थानं धूसरवर्णीयो भवति। दूरतः तथा कृष्णमेघविद्यमानत्वात् धूसरकृष्णयोर्मध्ये भेदो न अनुमीयते। काव्ये शक्तिमतः जनस्य उपमानरूपेण शैलदृष्टान्तः नैके वाराः समुपस्थापिताः। भयानकरसोद्रेककाले एतादृशस्य विषयस्य उपस्थापनं कविभिः प्रयुक्तम् दृश्यते।

*अविमारक*स्य चतुर्थाङ्के आत्महननव्याकुलाविमारकेण कृष्णमेघसदृशं कृष्णपर्वतशिखरं प्रत्यक्षीकृतम्–

असितजलदवृन्दैर्मिश्रसन्दिग्धशृङ्गो

गगनचरकुलानां विश्रमस्थानभूतः।

सुकविमतिविचित्रो मित्रसंयोगहृद्यो

नरपतिरिव नीचो दृश्यते निष्फलाढ्यः।।(४/९)

**राक्षसः** – असुरशब्दस्य बहुप्रतिशब्दाः *अमरकोशे* दृश्यन्ते[9]। अर्थात् सुरविरोधिनः असुराः इति। ते खलु सदा देवकार्येषु विघ्नमुत्पादयन्ति। पाशविकशक्तिसम्पनानाः, पापाचारिणश्च एतादृशा असुराः काव्येषु भयानकरसोत्पादिकाः। *नाट्यशास्त्रे* भयानकरसस्य कृष्णवर्णो भरतेन स्वीकृतः[10]। पापस्यापि कृष्णवर्णः कविसमयानुसारेण स्वीकृतः[11]। अतः एते खलु असुराणां कृष्णवर्णस्वीकरणस्य आशाया इति

अनुमीयते।

*मध्यमव्यायोगे* हिडिम्बापुत्रघटोत्कचस्य कृष्णकायः नवीनकृष्णमेघेन सह उपमितः–

ग्रहयुगलनिभाक्षः पीनविस्तीर्णवक्षाः
कनककपिलकेशः पीतकौशेयवासाः।
तिमिरनिवहर्णः पाण्डरोद्वृत्तदंष्ट्रो
नव इव जलगर्भो लीयमानेन्दुलेखः।।(१/५)

परिशेषे एतद् वक्तव्यं यत् जगति बहुविधकृष्णवर्णीयानि वस्तुनि सन्ति एव। कवयस्तु केवलमेतेषां वस्तुनां कृष्णत्वं स्वीकुर्वन्ति। अतोऽयं नियमकविसमयः।

**10. सूर्य-विम्बोष्ठयोः रक्तत्वम्** –

**सूर्यः**— काव्ये प्रकृतिशोभावर्णनविषयेषु प्रभातसन्ध्ययोः वर्णनं विशिष्टमेव। एवं प्रभातसन्ध्ययोः वर्णनसमये सूर्यवर्णनं कविभिः अवश्यमाचरणीयम्। नास्ति कोऽपि सूर्यस्य प्रकृतवर्णः। परन्तु उदयास्तकालयोः तस्य रक्तिमवर्णः कस्य मनो न हरति? विषयमेनं मनसि स्थिरीकृत्य कवयोऽपि तस्य केवलं रक्तवर्णं निर्दिष्टवन्तः इति अनुमीयते।

*अविमारकस्य* द्वितीयाङ्के सन्ध्यायां सूर्यस्यारुणवर्णः अविमारकेण वर्णितः –

पूर्वा तु काष्ठा तिमिरानुलिप्ता सन्ध्यारुणा भाति च पश्चिमाशा।
द्विधा विभक्तान्तरमन्तरिक्षं यात्यर्धनारीश्वररूपशोभाम्।।(२/१२)

*अभिषेक*नाटकस्य चतुर्थाङ्कस्यान्तिमे रामेणापि सन्ध्यार्कस्य रक्तवर्णः अङ्गीकृतः –

अस्ताद्रिमस्तकगतः प्रतिसंहृतांशुः सन्ध्यानुरञ्जितवपुः प्रतिभाति सूर्यः।
रक्तोज्ज्वलांशुकवृते द्विरदस्य कुम्भे जाम्बुनदेन रचितः पुलको यथैव।।(४/२३)

**बिम्बोष्ठः**— विना बिम्बोष्ठवर्णनं नारीसौन्दर्यवर्णनमपूर्णः एव। संस्कृतकवयोऽपि विषयमेनं सदा अनुसरन्ति। अपि च ओष्ठवर्णनकाले तस्य रक्तत्वमपि तैः सदा अङ्गीकृतमेव। अत्रोल्लेख्यं यत् क्वचित् नायकस्यापि रक्तवर्णीयौष्ठः तैः स्वीकृतः। विषयेऽस्मिन् वक्तव्यं यद् रक्तौष्ठेण यादृक् लावण्यं प्रतिभाति न तथा भाति रक्तेतराधतैः।

*अविमारकस्य* द्वितीयाङ्के नायिकारूपं स्मरति नायकः—

उरः स्तनतटालसं जघनभारखिन्ना तनुः
मुखं नयनवल्लभं प्रकृतिताम्रबिम्बाधरम्।
भयेऽपि यदि तादृशं नयनपात्रपेयं वपुः
कथन्नु सुरतान्तरप्रचुरविभ्रमं तद् भवेत्।।(२/६)

अत्रापि एतद् वक्तव्यं यत् जगति बहुनि रक्तवर्णीयानि वस्तुनि सन्ति एव। परन्तु कविभिः केवलमेताषां वस्तुनां रक्तत्वस्वीकरणादयं नियमकविसमयः।

**11. महाब्राह्मणपदे निन्दार्थे महच्छब्दस्य प्रयोगः**–

आचार्यः केशवमिश्रः तस्य *अलङ्कारशेखरग्रन्थे* महच्छब्दस्य प्रयोगविधिविषये विस्तरेणालोचितवान्[12]। तत्र ब्राह्मणपदेन सह निन्दार्थे महच्छब्दस्य प्रयोगः तेन निर्दिष्टः। तत्र *भट्टिकाव्यस्य* प्रथमसर्गस्य चतुर्थश्लोकस्य टीकायां भरतेन तथा *मृच्छकटिकस्य* प्रथमाङ्क, *रत्नावलीदृ*श्यकाव्यस्य टीकायामपि टीकाकारैः श्लोकोऽयमुपस्थापितः–

शङ्खे तैले तथा मांसे वैद्ये ज्योतिषिके द्विजे।
यात्रायां पथि निद्रायां महच्छब्दो न दीयते।।

अत्रापि ब्राह्मणार्थे प्रयुक्तेन द्विजपदेन सह महच्छब्दस्य प्रयोगः निवारितः। भासकृतिषु बहुत्रापि विदूषकं महाब्राह्मणपदेन सूचितम्। अत्र वक्तव्यं यत् जातिषु ब्राह्मणः श्रेष्ठः एव। अतः तेन सह पुनः महच्छब्दस्य प्रयोगो निर्थकः एव। क्वचित् दुर्थोऽपि प्रतिपादयति।

*यज्ञफलस्य* प्रथमाङ्के कञ्चुकीयः विदूषकं महाब्राह्मणपदेन सम्बोधितम्–

भो महाब्राह्मण, तव केन कार्यम् ।

*अविमारकस्य* द्वितीयाङ्केऽपि नायको विदूषकं महाब्राह्मणपदेनल सम्बोधितम्–

एषः समासः। सर्वथा प्रवेष्टव्यं कुन्तिभोजस्य कन्यापुरम्। तदनुमन्तुमर्हति महाब्राह्मणः।

**उपसंहारः—**

कवयो हि क्रान्तदर्शिनः। तेषां दृष्टिः इतरविलक्षणा। स एव प्रजापतिः काव्यलोके। स यथेच्छं स्रष्टुम् अलम्। अतः उक्तम्–

अपारे काव्यसंसारे कविरेकः प्रजापतिः।
यथास्मै रोचते विश्वं तथेदं परिवर्तते।।

विषयेऽस्मिन् प्रमाणपदवीमध्यास्ते कविसमयः एव। परन्तु कविसमयः काव्येषु कथमायातः इति प्रश्नस्तु स्वाभाविकः एव। किं केवलं कविकल्पनमेव तदुद्भवे वीजमुतः अलङ्कारशास्त्रं तदुद्भवस्थलम्? इति चेदत्रेदं वक्तव्यं यत् कविकल्पनमेव तदुत्पत्तौ कारणम्। कथमिति चेद्यथा भाषानदी सदा व्याकरणमनुसृत्य न प्रभवति तथैव काव्यस्रोतांस्यप्यलङ्कारशास्त्रं नानुसृत्य प्रवहन्ति। तर्हि काव्यशिक्षाभ्यासस्य काव्यहेतुत्वं कथं निगदितम्? इति चेदत्रेदं ब्रुमो यत् संस्कृतसाहित्यस्यादिमकाव्यानि अलङ्कारशास्त्रमनुसरणं विना हि विरचितानि। ततः तेषु काव्येषु या रीतिः कविभिः अनुसृता सा रीतिः अलङ्कारशास्त्रेऽपि प्रतिपाद्या अभूत्। तत्र उदाहरणं *रामायण*महाकाव्यम्। प्राक्*रामायणात्* किञ्चिदलङ्कारशास्त्रम् नासीत्। *रामायणो*त्तरकवीनां कृते *रामायण*मेव आदर्शभूतमासीत्। तत्र यथा विषयाः उपन्यस्ताः प्रतिपादनशैली सैव अलङ्कारशास्त्रे प्रतिपाद्योऽभूत्। तत्फलतया के के विषयाः काव्यनिर्माणे अवधेयाः इति तु *रामायणो*त्तरकवयः *रामायणा*देव ज्ञातवन्तः। तदूर्द्धं भासकालिदासादिभिः काव्यानि प्रणितानि जातानि। एवं क्रमशः संस्कृतवाङ्मयं विकशितमभूत्। काचन परम्परापि स्रष्टा जाता। तां परम्परां निरन्तरं विधातुमेव अलङ्कारशास्त्रं जनिं लेभे। एवमलङ्कारशास्त्रस्य उद्भवादनन्तरं ये कवयः प्रादुर्भवन् ते तत्शास्त्रमनुसृत्यैव काव्यं विरचितवन्तः। एवं कविसमयप्रसङ्गे अपि सममेव वक्तव्यम्। पुराकवयः आदिमकवयश्च तेषां काव्येषु यत्समयान् उल्लिखितवन्तः, ते एव कविसमयाः ततः अलङ्कारशास्त्रे प्रतिपाद्या अभवन्। अलङ्कारशास्त्रोत्तरभावीनां कवीनां समीपे ते एव कविसमयाः शिक्षण्या विषयाः सञ्जाताः। अतः पुराकविभिरुल्लिखिताः कविसमयाः प्रायः तेषां स्वमतिकल्पिताः किन्तु तदूर्द्धभावीनां ततोऽलङ्कारशास्त्रोत्तरभावीनां कवीनां प्रयुक्ताः कविसमयाः प्रायः तत्पूर्वजोल्लिखिताः तस्मात् काव्यज्ञशिक्षयाभ्यासस्य काव्यहेतुत्वमपि निर्विवादमिति।

नाट्यकारेषु प्रचीनतमो भासः। यद्यपि *नाट्यशास्त्रं* तत्पूर्वं रचितमेव, परन्तु *नाट्यशास्त्रे* कविसमयविषयकमालोचनं कुत्रापि न दृश्यते। अतः अनुमीयते यत् भासप्रयुक्तकविसमयाः प्रायः तत्पूर्वजकविभिः प्रयुक्ताः उत स्वकपोलकल्पिताः। *रामायणमहाभारत*योः यद्यपि अल्पकविसमया

दिक्पथमागच्छन्ति परन्तु भासपूर्वजनाट्यकाराणां दृश्यकाव्यानि अनाविष्कृतानि एव। अतः भासप्रयुक्तकविसमयाः प्रायः तस्य स्वीयमतिप्रसूता इति तु वक्तुं शक्यते।

परिशेषे वक्तुं शक्यते यत् भासो यथा *रामायणा*दिग्रन्थाश्रिताख्यानानि स्वीयप्रतिभाबलेन नवरूपेणालङ्कृत्य पाठकसकाशे परिवेशनमकृत। तथैव स दृश्यकाव्यस्य विषयवर्णनक्षेत्रेऽपि कविसमयरूपालङ्करणयन्त्रेण वर्णने वैचित्रं प्रदाय पाठकहृदये नवरसमसिचदिति शम्।

## Endnotes

1. अलङ्कृतं शुभैः शब्दैः समयैर्दिव्यमानुषैः। छन्दोवृत्तैश्च विविधैरन्वितं विदुषां प्रियम्।। (आदि १/२८)
2. “स्फुचलघुमधुरचित्रकान्तशब्दसमयोदारालङ्कृतगद्यपद्य।”
3. देशाकालकलालोकन्यायागमविरोधि च। प्रतिज्ञाहेतुदृष्टान्तहीनं दुष्टं नेष्यते। (काव्यालङ्कारः भामहकृतः- ४/२)। देशाकालकलास्वभावविरुद्धार्थानि लोकविरुद्धानि। कला चतुर्वर्गशास्त्रविरुद्धार्थानि विद्या विरुद्धानि।। (काव्यालङ्कारसूत्रवृत्तिः, वामनकृता २/२/२३-२४)
4. “मुख्यार्थहतिर्दोषो रसश्च मुख्यस्तदाश्रयाद्वाच्याः” (काव्यप्रकाशः, मम्मटकृतः- सप्तमोल्लासः)। रसापकर्षका दोषाः (साहित्यदर्पणः विश्वनाथकृतः- सप्तमपरिच्छेदः)।
5. स च त्रिधा स्वर्गो भौमः पातालीयश्च। स्वर्गपातलीययो भौमः प्रधानः। स हि महाविषयः। स च चतुर्धा जातिद्रव्यगुणक्रियारूपार्थतया। तेऽपि प्रत्येकं त्रिधा असतोनिबन्धनात्, सतोप्यनिबन्धनात्, नियमतश्च। (*काव्यमीमांसा* १४ अध्यायः)
6. पुष्पं प्रबालोपहितं यदि स्यान्मुक्ताफलं वा स्फुटविद्रुमस्थम्। ततोऽनुकुर्य्याद् विशदस्य तस्यास्ताम्रौष्ठपर्ययस्तरुचः स्मितस्य।। (*कुमार*- १/४४)
7. यशोहासप्रभृतेः शौक्लम् ( काव्यमीमांसा पञ्चदशाध्यायः)
8. *नाट्यशास्त्र* - ६/४४
9. असुरा दैत्यदैतेयदनुजेन्द्रारिदानवाः। शुक्रशिष्या दितिसुताः पूर्वदेवाः सुरद्विषः।। (१/१/१२/१/१)
10. गौरो वीरस्तु विज्ञेयः कृष्णश्चैव भयानकः। नीलवर्णस्तु वीभत्सः पीतश्चैवाद्भुतः स्मृतः।। (६/४४)
11. असतो गुणस्य निबन्धनम्। यथा- यशहासप्रभृतेः शौक्लम्, अयशसः पापप्रभृतेश्च कार्ष्ण्यम् .....(काव्यमीमांसा -१५ अध्यायः)
12. भूतेन्द्रभारतेशात् प्रञ्महच्छब्दो निरर्थकः। दुरर्थो ब्राह्मणे वृष्टिभोज्यौषधपथादिषु।। (पञ्चदशो मरीचिः)

## Bibliography


- Ali, Salim. *The Book of Indian Birds*, Bombay: The Bombay Natural History Society, 1941.
- Bhaṭṭyacharrya, Gurunath Tarkavidyanidhi. *Amarakoṣa*. Kalikat: Sanskṛit Pustak Bhaṇḍar, 1988.
- Dalal C.D. and Sastry R.A. ed *Kāvyamīmāṃsā of rājaśekhara.* 3rd ed. Baroda: Oriental Institute, 1934.
- Das, Jaykrishna Gupta and Haridas .ed. *Kāvyamīmāṃsā*. Benaras : Chaukhamba sanskrit series office, 1991.
- Datta, Shiva. and Paṇḍurangaparava, kasinath .ed. *Alaṅkāraśekhara*, Bombay: Nirṇaya Sagar press, 1923.
- De, Sushil Kumar. ed. *History of Sanskrit Poetics.*2nd ed. Calcutta: Firma K.L.Mukhopadhayay, 1960.

- Devadhar, C.R.ed. *Cārudatta*. Poona: Oriental Book Agency, 1943.
- Devadhar, C.R.ed. *Pañcarātra*. Poona: Oriental Book Agency,1957
- Jhalakikar, Vamanacharya Ramabhatta. ed. *Kāvyaprakāśa* .Poona: Bhandarkar Oriental Research,1983.
- Kane, P.V. *History of Sanskrit Poetics,* 3rd ed. Delhi Varanasi Patna: Motilal Banarasidass, 1961.
- Krishnacharya, T.R. *ed. śrīmadvālmīkirāmāyaṇa* (kiṣkiṃdhākāṇḍa), Bombay: Nirṇaya Sagar press, 1912.
- Kṛṣṇamācārya, and V. Ramacandrasharma, Ke. ed. *Alaṅkārasaṃgraha*. Madras: The Adhar Library ,1949.
- Mishra, Madhusudan .ed. *Kāvyamīmāṃsā*. Benaras: Chaukhamba sanskrit series office, 1934.
- Parashar, Sadhana. ed. *Kāvyamīmāṃsā of rājaśekhara*. New Delhi : D.k.Printworld(P.) Limited, 2000.
- Ray,Kumudranjan .ed. *Pratimānāṭaka. Calcutta: Nalanda Press,1942.*
- *Sharma, Ganesh Dutta. Ed. Svapnavāsavadattā*. Merath: Sahitya Bhandar, 2003
- Sharma ,Shivadatta. ed .*Kāvyānuśāsana,* (hemacandra), Bombay: Nirṇaya sagar press, 1934.
- Sharma, kedaranath. ed. *Mandāramarandacampū*, Bombay: Nirṇaya Sagar press, 1924.
- Shastri, Rajvaidya Jivaram Kalidas .ed. *Yajñaphala*. Kathiawar : The Rasashala Aushadhashram, 1941
- Shastri, Ramanarayaṇ Dutta .ed. *Mahābhārata(prathama khaṇḍa)*, Gorakhapura: Gitapresa.2004.
- Shastri, Srikṛṣṇamohana .ed. *Sāhityadarpaṇa*. (lakṣmīnāmakaṭīkāvibhuṣita). Banaras: Chaukhamba sanskrit series, 1947.
- Shastri,T.Ganapati .ed. *Abhiṣekanāṭaka*.Trivandrum: Travancore Government Press, 1913.
- Shastri, T.Ganapati . ed. *Avimāraka*. Trivandrum: Travancore Government Press, 1912.
- Shastri, T.Ganapati . ed. *Bālacarita* . Trivandrum: Travancore Government Press, 1912.
- Shastri, T.Ganapati. ed. *Madhyamavyāyoga, Dūtavākya, Dūtaghaṭotkaca, Karṇabhāra, ūrubhaṅga* , Trivandrum: Travancore Government Press, 1912.
- Shastri, T.Ganapati .ed. *Pratijñāyaugandharāyaṇa.* Trivandrum: Travancore Government Press, 1912.
- Whistler, Hugh .*Popular Handbook of Indian Birds*, London: Gurney And Jackson, 1949.


——